# नवमः पाठः । सूक्तिसुधा । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषा सुभाषितैः समलङ्कृता खलु। सुभाषितेभ्यः उद्धृताः नैकविधाः संस्कृतसूक्तयः न केवलं संस्कृते, अपि तु अन्यभाषास्वपि मार्मिकतया उत्स्फूर्ततया च उपयुक्ताः दृश्यन्ते। प्रायः जनाः सम्पूर्णं सुभाषितं न स्मरन्ति परन्तु सूक्तयः तेषां जिह्वाग्रे तिष्ठन्ति। भाषावैभवं वर्धयन्त्यः एतादृश्यः सूक्तयः छात्रैः सम्यक् पठितव्याः स्मर्तव्याः च।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥१॥**

[विद्याधनं चोरहार्यं न (अस्ति), राजहार्यं न, भ्रातृभाज्यं न, भारकारि (अपि) न (अस्ति)। व्यये कृते अपि (तत्) नित्यं वर्धते एव। (सत्यमेव विद्याधनं) सर्वधनप्रधानम् (अस्ति)। ]

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥२॥**

[लघुचेतसां (कृते) अयं निजः परः वा इति गणना (अस्ति)। उदारचरितानां (कृते) तु वसुधा एव कुटुम्बकम् (अस्ति)।]

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥३॥**

[वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। इदं शरीरं परोपकारार्थम् (एव अस्ति)।]

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चित्तं प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम्॥४॥**

[सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं तनोति। कथय! (सा सत्सङ्गतिः) पुंसां किं (हितं) न करोति?]

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥५॥**

[यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)। ]

**चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया।**
**सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता॥६॥**

[(यदा) चातकः पिपासया जलधरं त्रिचतुरान् पयःकणान् याचते (तदा) सः (मेघः) अपि विश्वम् अम्भसा पूरयति। हन्त हन्त (कियती एषा) महताम् उदारता !]

**ते शतं हि वयं पञ्च स्वकीये विग्रहे सति।**
**परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम्॥७॥**

[युधिष्ठिरः वदति – स्वकीये विग्रहे सति ते शतं वयं हि पञ्च (स्मः)। परैः विग्रहे प्राप्ते तु वयं पञ्चाधिकं शतं (स्मः)।]

**पठकः पाठकश्चैव ये चान्ये शास्त्रवाचकाः।**
**सर्वे व्यसनिनो ज्ञेया यः क्रियावान्स पण्डितः॥८॥**

[पठकः पाठकः (तथा) च ये अन्ये शास्त्रवाचकाः (सन्ति, ते) सर्वे व्यसनिनः ज्ञेयाः। (यतः) यः क्रियावान् सः (एव) पण्डितः (अस्ति)।]

## भाषाभ्यास:



**श्लोक: १**

**१. एकवाक्येन उत्तरत।**

अ) कै: धनं न ह्रियते ?

आ) केषु धनं न विभज्यते ?

इ) सर्वधनप्रधानं किम् ?

**२. माध्यमभाषया उत्तरत।**

विद्याधनं व्यये कृते कथं वर्धते ?

**३. सन्धिविग्रहं कुरुत।** वर्धत एव।

**४. समानार्थकशब्दं लिखत।**

चोर:, भार:, नित्यम्, विद्या, धनम्, प्रधानम्।

**५. विरुद्धार्थकशब्दं लिखत।**

व्यय:, नित्यम्, प्रधानम्।

**श्लोक: २**

**१. सन्धिं कुरुत।**

(अ) पर: + वा + इति   (आ) वसुधा + एव

**२. एकवाक्येन उत्तरत।**

अ) 'अयं निज:, अयं पर:' इति केषां गणना ?

आ) केषां कृते वसुधा एव कुटुम्बकम् भवति?

**३. माध्यमभाषया उत्तरत।**

लघुचेतस: उदारचेतस: जना: कथम् अभिज्ञातव्या: ?

**४. स्तम्भमेलनं कुरुत**

| | | | | |
|---|---|---|---|---|
| अ | स्वीयम् | चिन्तनम् | अन्य: | पृथिवी |
| आ | गणना | वसुधा | निज: | पर: |

**श्लोक: ३**

**१. एकवाक्येन उत्तरत।**

अ) परोपकाराय वृक्षा: किं कुर्वन्ति ?

आ) परोपकाराय नद्य: किं कुर्वन्ति ?

इ) का: परोपकाराय दुहन्ति ?

ई) शरीरं किमर्थम् ?

**२. माध्यमभाषया उत्तरत।**

परोपकार: नाम किम् ? के परोपकारमग्ना: ?

**३. एकवचने परिवर्तयत।**

अ) वृक्षा: फलन्ति।   आ) नद्य: वहन्ति।

**४. समानार्थकशब्दं लिखत।**

वृक्षा:, नद्य:, शरीरम्।

**५. विरुद्धार्थकशब्दं लिखत।**   उपकार:, पर:।

**श्लोक: ४**

**१. रिक्तस्थानं पूरयत।**

अ) सत्सङ्गति: धिय: जाड्यं ______ ।

आ) सत्सङ्गति: वाचि ______ सिञ्चति।

इ) सत्सङ्गति: ______ दिशति।

ई) सत्सङ्गति: पापम् ______ ।

उ) सत्सङ्गति: चित्तं ______ ।

ऊ) सत्सङ्गति: दिक्षु ______ तनोति।

**२. माध्यमभाषया उत्तरत।**

सत्सङ्गति: जीवने किं किं करोति?

**श्लोक: ५**

**१. सन्धिविग्रहं कुरुत।**

नार्यस्तु, यत्रैता:, एतास्तु, तत्राफला:, सर्वास्तत्र।

**२. एकवाक्येन उत्तरत।**

अ) देवता: कुत्र रमन्ते ?

आ) क्रिया: कुत्र अफला: भवन्ति ?

**३. माध्यमभाषया उत्तरत।**

'यत्र नार्य: पूज्यन्ते'। इति सूक्तिं श्लोकस्य आधारेण स्पष्टीकुरुत।

**४. एकवचने परिवर्तयत।**

अ) नार्य: पूज्यन्ते। आ) देवता: रमन्ते।

इ) एता: न पूज्यन्ते। ई) सर्वा: क्रिया: अफला:।

**५. 'नारी' इत्यर्थम् अमरकोषपङ्क्तिं लिखत।**

**श्लोक: ६**

**१. सन्धिविग्रहं कुरुत।**

अ) चातक: + ______= चातकस्त्रिचतुरान्।

आ) सोऽपि = ______ + अपि।

इ) विश्वम् + अम्भसा = ______ ।

ई) महताम् + ______ = महतामुदारता।

२. एकवाक्येन उत्तरत।

अ) चातक: पय:कणान् कं याचते ?

आ) जलधर: केवलं चातकस्य तृष्णां शाम्यति उत सम्पूर्णविश्वस्य ?

इ) महताम् उदारता कस्य दृष्टान्तेन ज्ञायते ?

३. माध्यमभाषया उत्तरत।

महताम् उदारता श्लोके कथं वर्णिता ?

४. रूपपरिचयं कुरुत।

अम्भसा, महताम्, पिपासया, पय:

५. समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत।

चातक: पयस: कणान् जलधरं याचते।

६. अमरकोषपङ्क्तिं लिखत। जलधर:, अम्भ:

श्लोक: ७

१. माध्यमभाषया उत्तरत।

'वयं पञ्चाधिकं शतम्' इति सूक्तिं स्पष्टीकुरुत।

२. श्लोकात् सप्तम्यन्तपदानि चिनुत लिखत च।

३. श्लोकात् सङ्ख्यावाचकानि चिनुत लिखत च।

श्लोक: ८

१. सन्धिविग्रहं कुरुत।

अ) पाठकश्चैव = _____ + च + _____।

आ) चान्ये = _____ + अन्ये।

इ) व्यसनिनो ज्ञेया: = _____ + ज्ञेया:।

ई) क्रियावान्स पण्डित: = क्रियावान् + _____ + पण्डित:।

२. एकवाक्येन उत्तरत।

अ) के व्यसनिन: उक्ता: ?

आ) क: पण्डित: उच्यते ?

३. माध्यमभाषया उत्तरत।

पाण्डित्यं कस्मिन् वर्तते ? यथार्थ: पण्डित: क: ?

४. सुभाषितात् समानार्थकशब्दं लिखत।

वाचक:, अध्यापक:, शास्त्रविद:, कार्यकर्ता, विद्वान्, बोद्धव्या:।

पठत अवगच्छत !     विसर्गसन्धि:

विश्वं विसर्गस्य।

